३

वेदभाष्यकाराः

प्रस्तावना

वेदस्य अर्थः न तावत् अतीव सुगमः। तथा च वैदिकसाहित्ये या भाषा व्यवहृता वर्तते सा भाषा अस्माकं संस्कृतभाषातः भिन्ना अपि वर्तते। अतः बहुभिः आचार्यैः वेदानाम् अर्थं प्रतिपादयितुं नैकानि भाष्याणि कृतानि वर्तन्ते। तेषु वेदभाष्यकृत्सु स्कन्दस्वामि-नारायण-उद्गीथ-माधवभट्ट-वेङ्कटमाधव-धानुष्कयज्व-आनन्दतीर्थ-आत्मानन्द-सायणप्रभृतयः भाष्यकाराः सुप्रसिद्धाः सन्ति सर्वत्र। अस्मिन् पाठे वेदस्य बहूनां भाष्यकाराणां विषये भवन्तः अवगमिष्यन्ति। तत्र आदिमे भागे ऋग्वेदस्य भाष्यकाराणां विषये, तथा मध्ये शुक्लयजुर्वेदस्य अन्ते च सामवेदीयानां भाष्यकाराणां विषये आलोचना विहिता।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- ऋग्वेदस्य भाष्यकाराणां विषये ज्ञास्यति।
- शुक्लयजुर्वेदभाष्यकाराणां परिचयं प्राप्तुं शक्नुयात्।
- तेषां देशकालकृतिविषये ज्ञातुं प्रभवेत्।
- ऋग्वेदादिकम् अवलम्ब्य लघुप्रबन्धं रचयितुं शक्नुयात्।

३.१) ऋग्वेदभाष्यकाराः

स्कन्दस्वामी ऋग्वेदस्य सुविस्तृतं भाष्यं कृतवान्। सः निरुक्तस्य अपि टीकां विरचितवान्। अयमेव सर्वप्रथमम् ऋग्वेदसंहितायाः भाष्यं विरचितवान्। इदं च भाष्यं वैदिकसाहित्ये अतीव आदरणीयमस्ति। अयं ग्रन्थकारः अत्यन्तं पुरातनः। इदं भाष्यं सुष्ठुविषयप्रतिपादकत्वात् जनैः समाद्रियते श्लाघ्यते च। स्कन्दस्वामी प्रतिभावान् प्रभाववान् च विद्वान् आसीत्। स्कन्दस्वामिनः जन्म गुर्जरप्रदेशस्य 'वलभी' इत्याख्यनगरे अभवत्। इदं च नगरं विद्यापीठतया प्रदेशस्य राजधानीस्वरूपम् आसीत्। अस्य पितुः नाम भर्तृध्रुवः आसीत्। ऋग्वेदभाष्यस्य प्रथमाष्टकस्य अन्ते भाष्यकारः स्वयम् अस्य चर्चाम् कृतवान्-

'वलभीविनिवासस्येतामृगर्थागमसंहृतिम्।
भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथा स्मृतिः॥'

३.१.१) स्कन्दस्वामी

आचार्यस्य स्कन्दस्वामिनः कालः कः आसीत् अस्मिन् विषये निश्चयेन वक्तुं न शक्यते। परवर्त्तिषु ग्रन्थेषु अस्य नामोल्लेखेन अस्य आविर्भावकालः सूचितो भवति। तेन अयं शतपथब्राह्मणस्य विख्यातो भाष्यकारः हरिस्वामिनः गुरुः आसीत्। अतः अस्य समयः सप्तमशतकमिति निश्चित्य वक्तुं शक्यते।

ऋग्वेदे स्कन्दस्वामी सुविस्तृतं विलक्षणं भाष्यं कृतवान्। अस्मिन् भाष्ये प्रत्येकं सूक्ताणाम् आरम्भे तस्य सूक्तस्य ऋषेः देवस्य च उल्लेखः वर्त्तते। तद्बोधकाः प्राचीनानाम् अनुक्रमणिग्रन्थानां श्लोकाः अपि उद्धृताः वर्तन्ते। निघण्टुनिरुक्तप्रभृतिभ्यः वैदिकार्थस्य उपबोधकेभ्यः ग्रन्थेभ्यः उपयुक्तं प्रमाणम् अपि तत्रैव सङ्कलितम् अस्ति। भाष्यमिदम् अतीव सरलम् अल्पाक्षरं च अस्ति। अत्र संक्षेपेण एव व्याकरण-विषयकतथ्यानाम् उल्लेखः अस्ति। सायणभाष्यस्य प्रथमाष्टक इव व्याकरणस्य अतिविस्तरेण प्रदर्शनम् अत्र नास्ति। सायणकृतस्य ऋग्भाष्यस्य उपरि स्कन्दस्वामिनः भाष्यस्य स्पष्टतः प्रभावः परिलक्षितः भवति। अस्य अनेकानि उदाहरणानि सन्ति। स्कन्दस्वामिनः भाष्यम् ऋग्वेदस्य चतुर्थाष्टकपर्यन्तम् एव समुपलब्धं भवति। शेषार्धस्य सम्पूर्त्तिः अन्येन आचार्यद्वयेन कृता अस्ति। यस्य वर्णनम् अग्रे भविष्यति। अनन्तशयनग्रन्थावल्याम् अस्य भाष्यस्य अधुना प्रकाशनं क्रमशः समारब्धम् अभवत्।

पाठगतप्रश्नाः

१. भाष्यकृतां केषाञ्चन विदुषां नामानि लिखत।
२. स्कन्दस्वामी कां टीकां लिखितवान्।
३. ऋग्वेदसंहितायाः सर्वप्रथमभाष्यम् अधुना कस्य उपलभ्यते।
४. स्कन्दस्वामिनः जन्म कुत्र जातम्।
५. स्कन्दस्वामिनः पितुः नाम किम्।
६. हरिस्वामिनः गुरुः कः।
७. शतपथब्राह्मणस्य विख्यातः भाष्यकारः कः।
८. स्कन्दस्वामी कस्य सुविस्तृतं भाष्यं विरचितवान्।

३.१.२) नारायणः

ऋग्वेदभाष्ये वेङ्कटमाधवेन लिखितमस्ति-

"स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात्।

चक्रुः सहैकमृग्भाष्यं पदवाक्यर्थगोचरम्"॥

अनेन ज्ञातो भवति यत् नारायणः उद्गीथः च स्कन्दस्वामिनः समये एव आस्ताम्। नारायणः ऋग्वेदभाष्यरचनायां स्कन्दस्वामिनः साहाय्यम् अकरोत् इत्येतद् वेङ्कटमाधवः कथयति। उद्गीथस्योल्लेखं सायणः आत्मानन्दश्च च कृतवन्तौ। तदीया भाष्यशैली स्कन्दस्वामिभाष्यशैलीव अस्ति। श्लोकक्रमाद् शब्देन च अनुमीयते यद् ऋग्वेदस्य मध्यभागे नारायणः स्वभाष्यं लिखितवान्। केचन विद्वांसः सामभाष्यकर्तुः माधवस्य पितरं नारायणं तथा ऋग्वेदभाष्यकर्त्तारं नारायणमेकमेव कल्पयन्ति। किञ्चास्याद्यावधि न किमपि सुस्पष्टप्रमाणं समुपलब्धं भवति। अस्याऽपि समयः विक्रमस्य सप्तमशताब्द्याम् एव प्रामाणितो भवति।

पाठगतप्रश्नाः

९. नारायाणः उद्गीतः च कस्य समये आस्ताम्।

१०. नारायणः ऋग्वेदभाष्ये स्कन्दस्वामिनं प्रति साहाय्यम् अकरोत् इत्येतद् कस्य मतमस्ति।

११. नारायणः कस्य समये आसीत्।

३.१.३) उद्गीथः

वेङ्कटमाधवस्य कथानुसारेण ज्ञायते यद् उद्गीथः स्कन्दस्वामिनं प्रति ऋग्भाष्यस्य लेखने साहाय्यं कृतवान्। अयं हि महापुरुषः ऋग्वेदस्य अन्तिमभागस्य भाष्यम् प्रणीतवान्। प्रत्येकाध्यायस्य परिसमाप्तौ तेन स्वविषये लिखितम् - 'वनवासीविनिर्गताचार्यस्य उद्गीथस्य कृता ऋग्भाष्ये.......अध्यायः समाप्तः' अनेन कथनेन उद्गीथाचार्यस्य वनवासिना सह कश्चित् सम्बन्धः आसीत् इति प्रतीयते। प्राचीनकाले आधुनिककर्णाटकस्य पश्चिमभूखण्डः 'वनवासीप्रान्तः' इति नाम्ना ख्यातः आसीत्। अतः विचार्यते - उद्गीथाचार्यः अस्यैव प्रान्तस्य निवासी आसीत् इति अनुमीयते। अस्य महापुरुषस्य विषये इतः अधिकं न किमपि ज्ञायते।

सायणः आत्मानन्दः च उद्गीथस्य नामोल्लेखं स्वभाष्ये अकुरुताम्। तदीया भाष्यशैल्यपि स्कन्दस्वामीभाष्यशैली इवाऽस्ति। अस्यापि प्रभावः सायणभाष्योपरि स्पष्टतः परिलक्षितो भवति। सायणः ऋग्वेदस्य अस्मिन् मन्त्रभाष्ये (१०/४६/५) उद्गीथस्य व्याख्यायाः उल्लेखं कृतवान्। तेन उद्गीथः सायणात् पूर्ववर्ती भाष्यकारः अस्ति इति ज्ञायते। इयं व्याख्या उद्गीथभाष्ये उपलभ्यते। भाष्यमिदम् ऋग्वेदस्य दशममण्डलस्य पञ्चमसूक्तात् आरभ्यः त्र्यशीतितमस्य सूक्तस्य पञ्चममन्त्रपर्यन्तं समुपलभ्यते। पञ्चत्रिंशदधिकोनविंशतितमे ख्रीष्टाब्दे लाहौरनगरस्य डी.ए.वी. महाविद्यालयस्य शोधविभागः अस्य भाष्यस्य प्रारम्भिकार्द्धभागं प्रकाशितवान्। अन्तिमः अर्द्धभागः इदानीम् अपि अमुद्रितः एवाऽस्ति। सायणभाष्येण सह उद्गीथभाष्यस्य यदि तुलना क्रियते तदा ज्ञायते यत् सायणः भाष्यस्य लेखनाय

उद्गीथभाष्ये स्थितानां विपुलसाधनानां साधु उपयोगं कृत्वा एव स्वभाष्यं रचितवान्। अत एव तिलकवैदिकसंशोधनमण्डले प्रकाशितस्य सायणभाष्यस्य त्रुटीणां सन्दिग्धपाठानां वा संशोधनाय उद्गीथभाष्यादेव साहाय्यं स्वीकृतम्। एवं प्रसिद्धस्य सायणभाष्यस्य पाठसंशोधनार्थम् अपि अस्य भाष्यस्य अतीव महत्त्वम् अस्ति।

पाठगतप्रश्नाः

१२. ऋग्वेदस्य अन्तिमभागस्य भाष्यं कः रचितवान्।

१३. प्राचीनकाले आधुनिककर्णाटकस्य प्रतीच्यभूखण्डः केन नाम्ना ख्यातः आसीत्।

१४. उद्गीथाचार्यः कस्य प्रान्तस्य प्रायः निवासी इति चिन्त्यते।

१५. पञ्चत्रिंशदधिकोनविंशतितमे ख्रीष्टाब्दे लाहौरनगरस्य डी.ए.वी. महाविद्यालयस्य शोधितविभागः कस्य भाष्यस्य प्रारम्भिकार्द्धभागं प्रकाशितवान्।

३.१.४) माधवभट्टः

इतिहासकाराः माधव-नामधेयानां चतुर्णां भाष्यकाराणां नामोल्लेखं कुर्वन्ति। तेषु एकः सामवेदसंहितायां किञ्च अन्ये त्रयः ऋग्वेदे भाष्यं लिखितवन्तः। केषाञ्चित् मते माधवो नाम कोऽपि भाष्यकारः नास्ति। सायणः अथवा वेङ्कट एव 'माधवः' इत्यनेन नाम्ना ख्यातः आसीत्। अन्येषां मते माधवः सायणात् वेङ्कटाच्च भिन्नः। माधवस्य ऋग्वेदे विलक्षणं पाण्डित्यं दृश्यते। सायणो वेङ्कटश्चोभौ माधवस्य भाष्यम् अनुसृतवन्तौ। अन्यः अप्येकः माधवोऽस्ति। यस्य ऋग्वेदप्रथमाष्टकस्य टीका सम्प्रत्येव मद्रासविश्वविद्यालयतः प्रकाशिता। अतीव सारगर्भिता इयम् एका न तथा विस्तृता। तथापि मन्त्राणाम् अर्थावबोधने नितान्तं महत्त्वपूर्णा अस्तीयं टीका। पण्डितसाम्बशिवशास्त्री वेङ्कटमाधवस्य जन्म द्वादशशतमेशवीयाब्दे अभूदिति मन्यते। वेङ्कटस्य भाष्यमतिसंक्षिप्तमस्ति। सः पर्यायवाचिपदानि उपस्थाप्य मन्त्रेण सह अर्थं च संग्रहीतुं प्रभूतं प्रयत्नं कृतवान्।

माधवभट्टोऽयं ऋग्वेदस्य महान् विद्वान् आसीत् इत्यत्र नास्ति कोऽपि सन्देहावसरः। अस्याः टीकायाः लेखनात् पूर्वमेव स एकादशानुक्रमणीः अलिखत्। यासु प्रत्येका अनुक्रमणी कोषवत् स्थित्वा ऋग्वेदस्य शब्दान् अर्थान् च प्रकटयितुं समर्थाऽस्ति। एतासु उपलब्धासु अनुक्रमणीषु द्वौ एवानुक्रमण्यौ प्रकाशितौ स्तः। ते अनुक्रमण्यौ नामानुक्रमणी आख्यातानुक्रमणी च द्वे भवतः। एतयोः अध्ययनेन इत्थम् अनुमातुं शक्यते यद् अत्र ऋग्वेदस्य नामधात्वोरेकत्र संग्रहः अस्ति। किञ्च अधिकाः अपि अतिमहत्त्वपूर्णानुक्रमण्यः-निर्वचनानुक्रमण-स्वरानुक्रमणी-छन्दानुक्रमणीप्रभृतयः अद्याऽपि न समुपलभ्यन्ते। एतासु अनुक्रमणीषु सर्वाधिकमहत्त्वपूर्णा अनुक्रमणी 'स्वरानुक्रमणी अप्युपलब्धा' नास्ति। अनेन ग्रन्थेन वैदिकस्वरस्य यज्ज्ञानं भवितुमर्हति तत्तु अन्यासु टीकासु भवितुं नार्हति। अस्य

वैशिष्ट्यस्य सङ्केतः वेदमर्मज्ञाः विद्वांसः प्रथममेव देवराजयज्वानः निघण्टुनिर्वचनाद् प्राप्तवन्तः। अनेन प्रतीतो भवति यद्देवराजयज्वा माधवेन सह भ्रान्तिशून्यतया परिचितो नासीत्। निजग्रन्थस्य प्रस्तावनायाम् असौ वेङ्कटमाधवस्य सङ्केतं कृतवान्। एतद् भवितुमर्हति यत् एष माधवकथनेन वेङ्कटमाधवम् एव अभिप्रैति। अस्य ग्रन्थस्य अनुशीलनेन ज्ञायते यत् माधवेन निर्दिष्टेषु विषयेषु एकोऽपि निर्देशः वेङ्कटमाधवस्य ग्रन्थे न उपलभ्यते। अपि च कतिपयाः निर्देशाः सायणमाधवस्य बृहद्भाष्ये एव मिलन्ति। ग्रन्थोऽयं तस्य स्वकीयरचना नास्ति। यदि अयं समग्रग्रन्थः समुपलब्धो भवेत् तर्हि देवराजयज्वनः सर्वे निर्देशाः अस्य अभिनवमाधवस्य ग्रन्थे एव मिलितुं शक्यन्ते। ग्रन्थस्यास्य यावदंशः समुपलब्धः अभवत् तस्मिन् भागेऽर्द्धाधिकनिर्देशाः मिलन्ति एव। तेनायं माधवो वेङ्कटमाधवाद्भिन्नः एवाऽस्तीति प्रमाणितः अभवत्।

पाठगतप्रश्नाः

१६. इतिहासकाराः केषां चतुर्णां भाष्यकाराणां नामोल्लेखं कुर्वन्ति।

१७. माधवस्य कुत्र विलक्षणं पाण्डित्यं दृश्यते।

१८. कौ द्वौ माधवभाष्यस्य अनुसरणं कृतवन्तौ।

३.१.५) वेङ्कटमाधवः

वेङ्कटमाधवः सम्पूर्ण-ऋक्संहितायाः उपरि स्वभाष्यं प्रणीतवान्। कतिपयैः आलोचकैः अनुमीयते यद् अयं विद्वान् ऋक्संहितायाः उपरि भाष्यद्वयं लिखितवान्। अयं वेङ्कटमाधवः स्वरचितस्य प्रथमभाष्यस्य अन्तिमे भागे स्ववंशपरिचयं प्रदत्तवान्। तदनुसारेण अयं वेङ्कटमाधवः वसिष्ठगोत्रे जन्म लब्धवान्। अस्य विदुषः पूर्वजाः आन्ध्रप्रदेशस्थितस्य दक्षिणापथीयचोलदेशे अवसन्। अस्य पिता वेङ्कटाचार्यः माता च सुन्दरीदेवी आसीत्। अस्य मातृगोत्रः अपि वसिष्ठः आसीत्। अस्य एकः सङ्कर्षणाख्यः अनुजः अपि आसीत्। अस्य वेङ्कटमाधवस्य वेङ्कटगोविन्दाख्यौ द्वौ पुत्रौ आस्ताम्। अस्य कालनिर्णयार्थम् नैके उपायाः सन्ति यैः अस्य समयः विशेषरूपेण निर्णेतुं शक्यते।

माधवस्य भाष्यम् अत्यन्तसंक्षिप्तम् अस्ति। '**वर्जयन् शब्दविस्तारं शब्दैः कतिपयैरिति**।' इति लिखित्वा तथ्यम् इदं सः स्वयं स्वीकृतवान्। भाष्ये अस्मिन् केवलं मन्त्रपदानाम् एव व्याख्या अस्ति। भाष्यस्य संक्षेपार्थं भाष्यकारः मूलपदानां समावेशम् अत्यल्पमेव अकरोत्। अस्य भाष्यस्य अध्ययनेन मन्त्राणाम् अर्थः सरलतया एव ज्ञातः भवितुम् अर्हति। स्कन्दस्वामिनः भाष्यस्य अपेक्षया अयम् भाष्यः अतिसंक्षिप्तः अस्ति। व्याकरणजन्यतथ्यानां निर्देशः तु अस्मिन् भाष्ये नास्ति एव। प्रायः सर्वत्र ब्राह्मणग्रन्थानां प्रामाण्यं सुष्ठुतया उल्लिखितम् अस्ति। येन माधवस्य ब्राह्मणग्रन्थेषु विशेषव्युत्पत्तिः प्रतीता

भवति। माधवः उक्तवान् यत् वेदानां गूढार्थस्य बोधार्थं ब्राह्मणग्रन्थाः नितान्तम् उपयोगिनः सन्ति। अतः तस्य कथनमस्ति-

'संहितायास्तुरीयांशं विजानन्त्यधुनातनाः।
निरुक्तव्याकरणयोरासीत् येषां परिश्रमः॥
अथ ये ब्राह्मणार्थानां विवेक्तारः कृतश्रमाः।
शब्दरीतिं विजानन्ति ते सर्वं कथयन्त्यपि॥' इति

माधवाचार्यस्य इयमेव आस्था अस्ति ब्राह्मणग्रन्थान् प्रति। एवमिदं भाष्यं ब्राह्मणानाम् अनुकूलम् अस्ति। दिल्लीनगरीतः मोतीलालबनारसीदासः इदं भाष्यं प्रकाशितवान्। अस्य भाष्यस्य सम्पादकः डा लक्ष्मणस्वरूपः अस्ति।

पाठगतप्रश्नाः

१९. वेङ्कटमाधवः कस्याः संहितायाः स्वभाष्यं प्रणीतवान्।
२०. वेङ्कटमाधवाचार्यः कस्मिन् गोत्रे जन्मग्रहणं कृतवान्।
२१. वेङ्कटमाधवस्य पितुः नाम किम्।
२२. वेङ्कटमाधवस्य मातुः नाम किम्।
२३. वेङ्कटमाधवस्य अनुजः कः आसीत्।
२४. वेङ्कटमाधवस्य कौ द्वौ पुत्रौ आस्ताम्।

३.१.६) आनन्दतीर्थः

आनन्दतीर्थः एव 'मध्व' इत्यनेन नाम्ना सुप्रसिद्धः आसीत्। अयं मध्वः स एव यः द्वैतवादस्य प्रवर्तनम् कृतवान्। एष बहून् ग्रन्थान् व्यरचयत्। अयम् आनन्दतीर्थः कतिपयानां वैदिकमन्त्रानां व्याख्यानं च अकरोत्। व्याख्यानमिदं छन्दोबद्धम् अस्ति। ऋग्वेदप्रथममण्डलस्य कतिपयानां मन्त्राणाम् उपरि एव इयं व्याख्याऽस्ति। अस्मिन् सन्दर्भे राघवेन्द्रयतेः कथनमिदं यथार्थरूपेण प्रमाणितः अस्ति- ‘ऋक्शाखागतैकोत्तरसहस्रसूक्तमध्ये कानिचित् चत्वारिंशत् सूक्तानि भगवत्पादैः........व्याख्यातानि।’

श्रीमद्भगवद्गीतायाम् आत्मविषये श्रीकृष्णस्य कथनमिदमस्ति- ‘वेदैश्च सर्वैरहमेव वेद्यः’ अर्थात् सर्वे वेदाः ममैव प्रतिपादनं कुर्वन्ति। एतेन हि वेदेषु सर्वत्र नारायणस्य एव प्रतिपादनम् अस्ति इति यत् आनन्दतीर्थाचार्यस्य मतमस्ति तत् सुष्ठु प्रतिपादितं भवति। स्वभाष्यस्य आरम्भे आनन्दतीर्थाचार्यः उक्तवान्-

'स पूर्णत्वात् पुमान् नाम पौरुषे सूक्त ईरितः।

स एवाखिलवेदार्थः सर्वशास्त्रार्थं एव च॥'

अर्थात् नारायणः पूर्णपुरुषोऽस्ति। अतः पुरुषसूक्ते- 'सहस्त्रशीर्षा पुरुषः' इत्यादौ ऋचि 'स एव' पुरुषपदेन अभिहितोऽस्ति। समस्तवेदानां शास्त्राणाम् च अभिप्रायः तस्यैव पूर्णपुरुषस्य प्रतिपादनम् अस्ति। अनया दृष्ट्यैव वैष्णवाचार्येण आनन्दतीर्थेन ऋङ्मन्त्राणाम् अर्थः कृतः। जयतीर्थस्य कथनानुसारेण भाष्येऽस्मिन् आधिभौतिकाधिदैविकयोः अर्थस्यातिरिक्तः आध्यात्मिकस्य अर्थस्याऽपि सुष्ठु प्रतिपादनमस्ति- ऋगर्थश्च त्रिविधो भवति। एकस्तावत् प्रसिद्धाग्निरूपः, अपरस्तदनन्तर्गतेश्वरलक्षणः, अन्योऽध्यात्मरूपः, तत्त्रितयपरञ्चेदं भाष्यम्।' विलक्षणमिदम् ऋग्वेदस्य माध्वभाष्यम्। द्वैतवादिषु अतीव प्रसिद्धमस्ति भाष्यमिदम्। अस्य मध्यभागस्य रचनाकालात् त्रिंशद्वर्षाभ्यन्तरे एव प्रसिद्धमध्वाचार्यः जयतीर्थः अस्य टीकां विरचितवान्। जयतीर्थस्य टीकायाः विवृतिं १७१८ विक्रमाब्दे नरसिंहः लिखितवान्। नारायणेनापि अपरा विवृतिः 'भावरत्नप्रकाशिका' - इति नाम्ना लिखिता अस्ति। आनन्दतीर्थस्य आविर्भावकालः विक्रमस्य पञ्चपञ्चाशदधिकद्वादशाब्दतः विक्रमस्य पञ्चत्रिंशदधिकत्रयोदशाब्दपर्यन्तं (१२५५- १३३५) स्वीकर्तुं शक्यते। श्रूयते यद् आनन्दतीर्थः अयम् अशीतिवर्षपर्यन्तं सुखम् अनुभूय परलोकम् अगमत्।

पाठगतप्रश्नाः

२५. आनन्दतीर्थः केन नाम्ना सुप्रसिद्धः आसीत्।
२६. आनन्दतीर्थस्य व्याख्यानमिदं कीदृशम् अस्ति।
२७. 'वेदैश्च सर्वैरहमेव वेद्यः' वचनमिदं कुत्र उपलभ्यते।
२८. आनन्दतीर्थाचार्यः कस्य सम्प्रदायस्य अस्ति।
२९. व्याख्याकारः नारायणः कः।
३०. मध्वः द्वैतवादस्य प्रवर्तनम् कृतवान् न वा।
३१. मध्वभाष्यं कस्य वेदस्य उपरि वर्तते।
३२. जयतीर्थस्य टीकायाः विवृतिं कः कदा कृतवान्।
३३. आनन्दतीर्थस्य आविर्भावकालः कः।

३.१.७) सायणाचार्यः

आचार्यसायणः विजयनगरसंस्थापकस्य महाराजबुक्कस्य महाराजहरिहरस्य च अमात्यः सेनानीः च आसीत्। सायणो वैदिकसम्प्रदायस्य यथार्थः ज्ञाता आसीत्। तस्मात् तदीयं वेदभाष्यं वेदार्थस्य सर्वेषु भाष्येषु श्रेष्ठं भाष्यम् अस्ति। सः सायणाचार्यः दुर्गमे तस्मिन् वेददुर्गे सरलतया एव वेदार्थस्य जिज्ञासुं प्रवेशयति।

महाराजस्य बुक्कस्य प्रधानम् मन्त्रिपदम् सायणाचार्यः १३६४ ख्रीष्टाब्दतः १३७८ ख्रीष्टाब्दपर्यन्तम् अलंकृतवान्। तदनन्तरं सः १३७९ ख्रीष्टाब्दतः १३८७ ख्रीष्टाब्दम् इति मृत्युपर्यन्तं महाराजस्य हरिहरस्य मन्त्रिपदम् अलङ्कृतवान्। अतः ख्रीष्टस्य चतुर्दशशताब्देः उत्तरार्द्धः एव सायणस्य भाष्यस्य रचनाकालः आसीत् इति कल्पयितुं शक्यते। सायणाचार्यस्य ज्येष्ठभ्राता आसीत् माधवाचार्यः। माधवाचार्यः भ्रातरं सायणाचार्यं व्याख्याकार्ये प्रवृत्त्यर्थं प्रेरितवान्। भ्रात्रा प्रेरितः एव अयं सायणाचार्यः व्याख्याकार्ये प्रवृत्तः जातः। तेन भाष्यम् इदं माधवीयनाम्ना विश्वप्रसिद्धम् अभवत्।

पाठगतप्रश्नाः

३४. आचार्यः सायणः कयोः राज्ञोः अमात्यः सेनानीः च आसीत्।

३५. आचार्यसायणस्य किं भाष्यमस्ति।

३६. महाराजस्य बुक्कस्य प्रधानम् मन्त्रिपदम् सायणाचार्यः कदा आरभ्य कदा पर्यन्तम् अलंकृतवान्।

३७. सायणभाष्यस्य रचनाकालः कः।

३८. सायणाचार्यस्य भ्रातुः नाम किम्।

३९. महाराजस्य हरिहरस्य मन्त्रिपदं कदा सायणाचार्यः अलंकृतवान्।

३.२) सामभाष्यकाराः

३.२.१) माधवः

अयं माधवः सामसंहितायाः प्रथमभाष्यकारः प्रतीतः भवति। सः सामवेदस्य उभयोः खण्डयोः - छन्दार्चिकोत्तरार्चिकयोः उपरि भाष्यं निर्मितवान्। अस्य भाष्यस्य नाम 'विवरणम्' अस्ति। छन्दार्चिकभाष्यस्य नाम 'छन्दसिकाविवरणम्' तथा उत्तरार्चिकभाष्यस्य नाम 'उत्तरविवरणम्' अस्ति। अद्यावधि इदं भाष्यम् अमुद्रितावस्थायाम् एवास्ति। सत्यव्रतसामश्रयीमहोदयः इदं भाष्यम् अन्विष्टवान्। सः सर्वप्रथमं स्वकीयसायणभाष्यसंस्करणे अस्य अपि भाष्यस्य किमपि अंशं टिप्पणी-रूपेण सन्निविष्टवान्।

माधवस्य पितुः नाम नारायणः आसीत्। कतिपयविद्वांसः स्कन्दस्वामिनः ऋग्भाष्यस्य पूरकः सहायकश्च नारायणाद् अभिन्नम् मन्यते। किञ्च तयोः अभिन्नताप्रदर्शकस्य प्रबलप्रमाणस्य अद्यापि अभावः एव अस्ति। तथापि अस्य आविर्भावकालः निश्चितरूपेण वक्तुं शक्यते। द्वादशशतकस्य देवराजयज्वा स्वीयनिघण्टुभाष्यस्य भूमिकायां कस्यापि माधवस्य निर्देशं कृतवान्। सम्भवतः अयं माधव एव सामभाष्य-रचयिता अस्ति। न तावद् एतावता अपि तु बाणभट्टस्य कादम्बर्याः श्लोकः अयम् अस्ति -

'रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमः स्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः॥

माधवस्य 'सामविवरणे' मङ्गलाचरणरूपेण अयं समुपलब्धः भवति। अस्य श्लोकस्य 'त्रयीमयाय' इति अनेन शब्देन ज्ञातो भवति यद् अयं श्लोकः कस्यापि वैदिकग्रन्थस्य एव मङ्गलाचरणम् आसीत्। अतः अनुमानं क्रियते यत् - सर्वप्रथमं सामभाष्यस्य मङ्गलार्थं माधवः एनं श्लोकं प्रणीतवान्। भाष्यकारमाधवः बाणभट्टस्य पूज्याचार्यः कश्चित् भवितुम् अर्हति। बाणभट्टस्य पूर्वपुरुषाः अपि वेदपारङ्गताः विद्वांसः आसन्। हर्षचरितेन प्रमाणितः भवति यद् बाणभट्टस्य गुरुः अपि कोऽपि वेदवेदाङ्गपारङ्गतः विद्वान् एव आसीत्। घटनेयं पूर्वानुमानम् एव पोषयति। अतः बाणभट्टस्य पूर्ववर्तिनः माधवस्य समयः विक्रमस्य सप्तमशतकपरवर्ती इति स्वीकर्तुं न शक्यते। अतः यदि बाणभट्टः ख्रीष्टस्य सप्तमशतकस्य प्रारम्भकाले आसीत् तर्हि अयं माधवः षष्ठशतकवर्ती इति वक्तव्यम्। माधवस्य भाष्यमिदम् अतीवमहत्त्वपूर्णम् अस्ति।

पाठगतप्रश्नाः

४०. सामसंहितायाः प्रथमभाष्यकारः कः।
४१. माधवेन कृतस्य भाष्यस्य नाम किम्।
४२. 'विवरणम्' इत्यस्य भाष्यस्य अन्वेष्टा कः।
४३. माधवस्य पितुः नाम किम्।
४४. 'त्रयीमयाय'- अनेन शब्देन किं ज्ञातो भवति।

३.२.२) गुणविष्णुः

गुणविष्णुः साममन्त्रस्य व्याख्यां विरचितवान्। तस्य व्याख्यानस्य मिथिलायां बङ्गप्रदेशे चातिप्रसिद्धिः अस्ति। सः नित्यनैमित्तिकविधानोपयोगिनां साममन्त्राणां व्याख्यां कृत्वा अतिमहत्त्वपूर्णं कार्यं कृतवान्। अयं महापुरुषः मिथिलायाः बङ्गप्रदेशस्य वा कस्मिंश्चिदपि भागे न्यवसत्। अस्य छान्दोग्यमन्त्रभाष्यस्य एकं सुष्ठु संस्करणम् आसीत्। तत् भाष्यं 'कलकत्ता-संस्कृत-परिषद्' इति नाम्नः संस्थातः प्रकाशितं जातम्। अस्य ग्रन्थस्य प्रस्तावनायां विद्वान् सम्पादकः गुणविष्णोः विषयेऽनेकानां ज्ञातव्यविषयाणां विवेचनं कृतवान्।

छान्दोग्यमन्त्रभाष्यम् इदं सामवेदस्य कौथुमशाखायाः उपरि अस्ति। ('हलायुधेन काण्वे कौथुमे गुणविष्णुना') 'सायणकृतमन्त्रभाष्यस्याधारः गुणविष्णोः भाष्यमेवाऽस्ति' इति वदन्ति आलोचकाः। हलायुधेन अपि अस्य ग्रन्थस्योपयोगः कृतः इत्यपि प्रमाणो मिलति। गुणविष्णुः बल्लालसेनस्य अथवा

तस्य प्रसिद्धपुत्रस्य लक्ष्मणसेनस्य राज्यकाले विद्यमानः आसीत्। अतोऽस्य गुणविष्णोः समयः विक्रमस्य द्वादशशतकस्य अन्तिमभागः त्रयोदशशतकस्यादिमभागश्च निश्चीयते।

गुणविष्णोः 'छान्दोग्यमन्त्रभाष्यम्' नितान्तं विख्यातः ग्रन्थोऽस्ति। अस्य द्वावन्यावपि ग्रन्थौ स्तः:- मन्त्रब्राह्मणभाष्यम्, पारस्करगृह्यसूत्रभाष्यञ्चेति। अनेन ज्ञातो भवति यदयं महानुभावः तस्मिन् काले प्रख्यातवैदिकः आसीत्।

पाठगतप्रश्नाः

४५. गुणविष्णोः साममन्त्रव्याख्यानस्य नाम कुत्र अतिप्रसिद्धः अस्ति।
४६. गुणविष्णुः कस्य व्याख्यानं विरचितवान्।
४७. गुणविष्णुः कुत्र अवसत्।
४८. छान्दोग्यमन्त्रभाष्यस्यैकम् सुष्ठु संस्करणम् कुत्र प्रकाशितं जातम्।
४९. गुणविष्णुः कस्य राज्यकाले विद्यमानः आसीत्।
५०. बल्लालसेनस्य पुत्रस्य नाम किम्।
५१. गुणविष्णोः कः समयः निश्चीयते।
५२. गुणविष्णोः नितान्तविख्यातः ग्रन्थः कः।

३.३) शुक्लयजुर्वेदभाष्यकाराः

३.३.१) उव्वटः

उव्वटः काश्मीरप्रदेशीयः विद्वान् इति बहूनां मतम् अस्ति। एतस्य क्वचित् 'औबटः' क्वचित् च 'उवट' इत्यपि नाम उपलभ्यते। उव्वटः यजुर्वेदसंहितायां स्वनाम्ना भाष्यं रचितवान् यद् अधुनापि लभ्यते। अस्य पितुर्नाम 'वज्रटः' इति आसीत्। 'अयं मम्मटस्य भ्राता' इति सुधासागरकारस्य भीमसेनस्य मतम्। परन्तु सन्ति उवटस्य विषये काश्चन विप्रतिपत्तयः। तथा हि तेन रचिते यजुर्वेदसंहितायाः भाष्ये पद्यमेकम् उपलभ्यते-

'ऋष्यांदीनश्च पुरस्कृत्य अवन्त्यामुवटो वसन्।
मन्त्रभाष्यमिदं चक्रे भोजे राष्ट्रं प्रशासति।।' इति।

तस्यैव भाष्यस्य पुस्तकान्तरे अन्यदपि पद्यमेकम् उपलभ्यते-

'आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।
मन्त्रभाष्यमिदं क्लृप्तं भोजे पृथ्वीं प्रशासति।।'इति।

एतेन पद्यद्वयेन 'उव्वटः' वज्रटस्य पुत्रः भोजसमकालिकः च आसीत् इति प्रतिपाद्यते। यदि अयम् उव्वटः भीमसेनकथनेन मम्मटस्य भ्राता अभविष्यत्, तर्हि मम्मटस्य जैयटपुत्रत्वात् तद्भ्रातुः उव्वटस्यापि जैयटपुत्रत्वम् अभविष्यत्। तदा उव्वटस्य श्लोकोक्तं वज्रटपुत्रत्वं कथमपि न सङ्गच्छते। यद्यपि काश्मीरदेशीयस्य जैयटगोत्रस्य वज्रटस्य दत्तकपुत्रः अयम् उव्वटः इति कल्पनायां जैयटपुत्रस्य उव्वटस्य वज्रटपुत्रत्वम् उपपद्यते, तथापि तस्य भोजसमकालिकत्वम् अनुपपन्नम् एव। यतः तस्य ज्येष्ठभ्रातुः मम्मटस्य भोजराजाद् अर्वाक्तनत्वं सिद्धम् अस्ति। अतः तस्य कनिष्ठभ्रातुः उव्वटस्य अपि सुतरां भोजराजाद् अर्वाक्तनत्वं सिद्ध्यति। अवन्त्याम् (उज्जयिन्याम्) वसन् सः भाष्यं निर्मीतवान् इति एकत्र उल्लेखः, गुर्जरदेशप्रसिद्धे आनन्दपुरे वसन् सः भाष्यं निर्मीतवान् इति अपरत्र उल्लेखः, एतद् अपि विप्रतिषिद्धम् इव। यदि उव्वटस्य पिता वज्रटः एव आनन्दपुरवास्तव्यः आसीत्, उव्वटः तु उज्जयिन्यां वसन् एव भाष्यं निर्मीतवान् इति कल्प्यते तदापि वज्रटस्य काश्मीरिकत्वं सन्दिह्यते एव।

महाराजः भोजः धारानगरशासकः परमारवंश्यः च आसीत्। स हि १०१८ ईशवीये सिंहासनारूढः भूत्वा १०६३ ईशवीयपर्यन्तं राज्यं कृतवान् इति तस्य कालः एकादशशतकम्। भोजस्य कविजनप्रियत्वं प्रसिद्धम्। शेखगिरिशास्त्रिणः लिखन्ति यद् अयं भोजः धारातः स्वां राजधानीम् उज्जयिनीम् आनीतवान् इति 'आइने अकबरी' पुस्तके लिखितं वर्तते। तेन पूर्वम् उल्लिखितस्य भोजराजस्य समयः १०१८ ईशवीयतः १०६३ ख्रीष्टीयः वर्तते। अतः भोजराजसमयकालिकत्वेन उव्वटः ख्रीष्टीयस्य एकादशशतकस्य पूर्वार्द्धे आसीत् इति निश्चयेन वक्तुं शक्यते। अस्य भाष्यं लघ्वक्षरम् अपि सत् अतीव प्रोज्ज्वलम्, सरलं प्रामाणिकं च अस्ति। भाष्ये अस्मिन् अनेकमन्त्राणाम् अध्यात्मपरकः अर्थः दर्शितः अस्ति। अनेन प्रतीतः भवति यद् अयं मध्ययुगस्य एकः नितान्तप्रौढः वेदज्ञः आसीत्। अस्य अन्यासु कृतिषु - (क) ऋक्प्रातिशाख्यस्य टीका, (ख) यजुःप्रातिशाख्यस्य टीका, (ग) ऋक्सर्वानुक्रमणीभाष्यम्, (घ) ईशावास्योपनिषद्-भाष्यं च इति चत्वारः ग्रन्थाः नितान्तप्रौढाः, प्रसिद्धाः प्रकाशिताः चेति।

पाठगतप्रश्नाः

५३. उव्वटः कस्य देशस्य विद्वान् आसीत्।

५४. उव्वटः यजुर्वेदसंहितायां स्वनाम्ना भाष्यं रचितवान् न वा।

५५. उव्वटस्य पितुः नाम किम्।

३.३.२) महीधरः

वैदिककालाद् एव संस्कृतविद्यायाः अन्यतमं प्रधानकेन्द्रं काशी आसीद् इति वयं सर्वे जानीमः। अत्र एव गौतमप्रभृतयः अन्ये च बहवः वेदमन्त्रद्रष्टारः विद्वांसः अभवन्। इतिहासपुराणेषु अपि विशिष्टपण्डितेन सुसज्जिता काशी आसीद् इत्यपि स्पष्टम् एव।

आचार्यमहीधरस्य जन्म अस्याम् एव काश्याम् अभवत्। तत्र च तस्य वासस्थानस्य समीपे एका पुष्करिणी अद्य अपि वर्त्तते इति परम्परातः श्रूयते। नागर-ब्राह्मणवंशीयः अयं विद्वान् आसीद् इति। सः काश्याम् एव अध्ययनं विधाय विद्वज्जनेषु प्रतिष्ठां प्राप्तवान्। ततःपरं कतिपयान् ग्रन्थान् विरच्य महीधरः काशीनरपतेः शरणं गतवान्। अत एव प्रायः 'यथा राजाश्रितः पण्डितः 'महीधरः' इति तस्य एव उक्त्या संगच्छते। तत्रैव सः वेददीपनामकस्य सामभाष्यस्य रचनां सम्पादितवान्। यद्यपि भाष्यमिदं न मौलिकं तथापि अर्थस्य विशदतया दृष्ट्या नितान्तं ग्राह्यम् अस्ति। अस्य सामभाष्यस्य पाण्डुलिपिः सरस्वतीभवनपुस्तकालये संगृहीता अस्ति। अस्य भाष्यस्य उपरि उव्वटभाष्यस्य स्पष्टच्छाया दृश्यते। किञ्च अयं विद्वान् निरुक्तश्रौतसूत्रादिग्रन्थेभ्यः उदाहरणनानि दत्त्वा याज्ञिकक्रियायाः विधानं कृतवान्। काशीवासी अयं महीधरः तन्त्ररहस्यज्ञः आसीत्। अयं महीधरः वैदिकसाहित्ये पारङ्गमः आसीत्। अयं महीधराचार्यः प्रतिभावान् प्रभाववान् च विद्वान् आसीत्। तन्त्रादीन् रहस्यमयान् शास्त्रान्तरान् चापि स सम्यक् अधीतवान्। सः विनयेन भक्त्या च गुरुजनान् तथा समप्रीणयत्। येन ते यथा अस्मै गुह्याद् गुह्यतराणि अपि रहस्यवस्तूनि उपदिष्टवन्तः। सर्ववेदपारङ्गतः अयं परमविद्वान् आचार्य इति उपाधिं प्राप्तवान्। महीधरः 'मन्त्रमहोदधि'-नाम्ना तन्त्ररहस्यविवेचकम् एकं ग्रन्थं विक्रमस्य १६४५ शतके (१५८८ई०) रचितवान्। अस्य ग्रन्थस्यान्ते भाष्यकारेण लिखितम् इदम्-

'अब्दे विक्रमतो जाते बाणवेदनृपैर्मिते।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः॥' इति

अतः अस्य भाष्यकारस्य समयः षोडशशतकस्य उत्तरार्द्धः इति निश्चीयते। उव्वटाचार्यात् पञ्चाशद्वर्षानन्तरम् अयम् अभवत्। महीधराचार्यः नरसिंहस्य उपासकः आसीत्। तस्य उल्लेखः ग्रन्थेषु बहुशः उपलभ्यते।

पाठगतप्रश्नाः

५६. वैदिककालाद् एव संस्कृतविद्यायाः अन्यतमं प्रधानकेन्द्रं किम् आसीद्।

५७. काश्यां जातानां केषाञ्चन विदुषां नामानि लिखन्तु।

५८. नागर-ब्राह्मणवंशीयः विद्वान् कः।

५९. महीधरः काश्याम् अध्ययनं समाप्य कस्य शरणं गतवान्।

६०. महीधरः कस्य वेदस्य भाष्यं रचितवान्।

६१. महीधरः तन्त्ररहस्यज्ञः आसीत् न वा।

६२. 'मन्त्रमहोदधि'- एनं ग्रन्थं कः लिखितवान्।

६३. महीधरस्य कः समयः निश्चीयते।

६४. महीधरः कस्य उपासकः।

३.३.३) हलायुधः

सायणस्य परवर्त्तिनः अनन्ताचार्य-आनन्दबोधप्रभृतयः बहुशः विद्वांसः काण्वसंहितायाः उपरि भाष्याणि अकुर्वन्। किञ्च सायणात् पूर्ववर्त्तिषु प्रधानाचार्येषु हलायुधः एव शुक्लयजुर्वेदस्य काण्वसंहितायाः उपरि विशिष्टं भाष्यं विरचितवान्। अस्य भाष्यस्य नाम 'ब्राह्मणसर्वस्वम्' इति अस्ति। भाष्यारम्भे एव हलायुधः स्वविषये किञ्चित् लिखितवान्। बाल्ये एवायं हलायुधः राजपण्डितः अभवत्। नवयौवने सः श्वेतच्छत्रधारणस्याधिकारं प्राप्तवान्। वार्द्धक्ये नृपलक्ष्मणसेनस्य धर्मस्य अधिकारिपदे च सः नियुक्तः जातः।

'बाल्ये ख्यापितराजपण्डितपदं श्वेतार्चिबिम्बोज्ज्वल-
च्छत्रोत्सिक्तमहामहस्तमुपदं दत्वा नवे-यौवने।
यस्मै यौवनशेषयोग्यमखलक्ष्मापालनारायणः
श्रीमान् लक्ष्मणसेनदेवपतिर्धर्माधिकारं ददौ।।'

नृपात् बल्लालसेनात् परं तदात्मजः 'लक्ष्मणसेनः' अतीवयोग्यतापुरःसरं गौडक्ष्मां रक्षितवान्। ख्रीष्टस्य सप्तत्यधिकैकादशाब्दे अयं राजसिंहासनम् आरूढः अभवत् (द्रष्टव्यः - प्राचीनभारतस्येतिहासः - स्मिथः)। लक्ष्मणसेनः त्रिंशद्वर्षाणि (३० ब.) सः राज्यं करोति स्म। आर्त्तेभ्यो मुक्तहस्तेन दानं कुर्वन् आसीत्। स पराक्रमे इन्द्रतुल्यः आसीत्। तस्य राज्ये सर्वे सुखेन वसन्ति स्म। असौ त्रिंशद्वर्षाणि शासनं विधाय ख्रीष्टस्य द्वादशतमे वर्षे परलोकं गतवान्। हलायुधः गौडक्षितिपालस्य लक्ष्मणसेनस्य धर्माध्यक्षः आसीत्। लक्ष्मणसेनस्य समयः वि.स. १२२७-१२३७ (ईशवीयस्तु ११७०-१२००) विद्यते। अतः हलायुधोऽपि तत्कालिक एव आसीदिति।

हलायुधः तस्य कालस्य प्रसिद्धो वैदिकविद्वानासीत्। हलायुधः ब्राह्मणसर्वस्वम् इति ग्रन्थं लिखितवान्। अयं हलायुधः शैवदर्शनस्य आचार्यः आसीत्। अयं वेद-मीमांसामर्मज्ञः वेदपारङ्गतः च आसीत्। विशेषतः शैव-वैष्णवागमयोः रहस्यज्ञो विद्वान् आसीत्। अस्य कृतिषु ब्राह्मणसर्वस्वम्, मीमांसासर्वस्वम्, वैष्णवसर्वस्वम्, शैवसर्वस्वम्, पण्डितसर्वस्वञ्चेति पञ्च ग्रन्थाः नितान्तप्रौढाः प्रसिद्धाः च आसन्। हलायुधः स्वयोग्यताबलेन गौडराज्याधिपतेः लक्ष्मणसेनस्य सभापण्डितः धर्माध्यक्षश्चाभवत्।

पाठगतप्रश्नाः

६५. हलायुधः कस्य वेदस्य कस्याः संहितायाः उपरि स्वस्य विशिष्टभाष्यं रचितवान्।

६६. हलायुधस्य भाष्यस्य नाम किमस्ति।

६७. लक्ष्मणसेनः कति वर्षाणि यावत् राज्यं कृतवान्।

६८. लक्ष्मणसेनस्य समयः कः।

६९. हलायुधः कस्य दर्शनस्य आचार्यः आसीत्।

७०. हलायुधस्य प्रसिद्धाः के ग्रन्थाः सन्ति।

३.३.४) भट्टभास्करः

भट्टभास्करस्य समयनिर्धारणं वैदिकभाष्यकाराणाम् इतिहासार्थं नितान्तमावश्यकमस्ति। सायणाचार्यः स्वभाष्ये भट्टभास्करमिश्रं स्मरति। एतेन ज्ञायते यत् सः विक्रमस्य पञ्चदशशतकपूर्ववर्ती आसीत्। सायणपूर्ववर्त्ती लक्ष्मणापरनामको वेदाचार्यः स्वीये सुदर्शनमीमांसाग्रन्थे न केवलं भट्टभास्करमिश्रस्य नामोल्लेखं कृतवान्। अपि तु स तस्य ज्ञानयज्ञनामकभाष्यग्रन्थस्याऽपि उल्लेखं कृतवान्। 'तत्र भाष्यकृता भास्करमिश्रेण ज्ञानायज्ञाख्ये भाष्ये एतत्प्रमाणव्याख्यानसमये चरणमिति देवताविशेष इति तदनुगुणमेव व्याख्यातम्।' (सुदर्शनमीमांसा पृ.४)। देवराजयज्वापि स्वग्रन्थेऽस्य भाष्यम् च उद्धृतवान्। प्रसिद्धवैदिकः हरदत्तः एकाग्निकाण्डस्य स्वभाष्ये भास्करकृतभाष्यात् साहाय्यं स्वीकृतवान्। अतः भास्करमिश्रस्य समयः विक्रमस्यैकादशतकमिति कथयितुं शक्यते। हरिदत्तः स्वभाष्ये आर्यभट्टीय-अमरकोष-काशिकाप्रभृतिग्रन्थानां नामोल्लेखञ्च कृतवान्। तेनाऽपि हरदत्तादिभाष्यकाराद् अस्य पूर्वकालिकत्वं प्रतीयते। एतदपि पूर्वकथितसमयकत्वमस्य साधयति।

भट्टभास्करः तैत्तिरीयसंहितायाः उपरि ज्ञानयज्ञनामकं भाष्यम् लिखितवान्। भाष्यमिदं बहुतथ्येन समृद्धमस्ति। प्रमाणपुरःसरं कतिपयानां वैदिकग्रन्थानां मन्त्रस्योद्धरणमनेन समुपस्थापितमस्मिन्भाष्ये। विद्वान् भट्टभास्करः लुप्तनिघण्टुग्रन्थादपि उद्धरणं संगृहीतवान्। सः मन्त्राणामर्थप्रदर्शनसमये विभिन्नाचार्याणाम् अभिमतानि अपि प्रदर्शितवान्। अस्मिन् भाष्ये न केवलं यज्ञपरकस्य अर्थस्य निर्देशनमस्त्यपि तु अध्यात्माधिदैवपक्षयोरप्यर्थस्य प्रदर्शनं कृतमनेन। यथा - 'हंसः शुचिषद्वसुरन्तरिक्षसत्' प्रसिद्धे अस्मिन् मन्त्रे 'हंस'-पदस्य त्रिभिः प्रकारैः व्याख्या कृताऽनेन। तद्यथा= अधियज्ञपक्षे हंसपदस्य व्याख्या - 'हन्ति पृथिवीमिति हंसः' अधिदैवपक्षे- हंसपदस्यार्थः आदित्यो भवति, तथा अध्यात्मपक्षे- 'हंसः'-पदस्यार्थः 'आत्मा' कृतोऽनेन। अतः अस्य भाष्यस्य वैदिकसाहित्ये अतीव महत्त्वम् अस्ति।

३.४) अथर्ववेदस्य भाष्यकाराः

३.४.१) गोविन्दस्वामी

त्रयोदशशतकोद्भवः 'दैव' इति पदस्य टीका 'पुरुषाकारः' इति। अस्याः टीकायाः कर्त्ता श्रीकृष्णलीलांशुकमुनिः। श्रीकृष्णलीलांशुकमुनिः १९८ कारिकायाः टीकायां गोविन्दस्वामिनः नामोल्लेखं कृतवान्। अयं ग्रन्थः अनन्तशयनग्रन्थमालायां प्रकाशितोऽस्ति। उद्धरणमिदं माधवीयधातुवृत्तौ अपि मिलति। बौधायनीयधर्मविवरणस्य कर्त्ताऽपि सम्भवतः अयमेवाऽस्ति। अस्मिन् ग्रन्थे कुमारिलस्य तथा तस्य ग्रन्थस्य तन्त्रवार्त्तिकस्य अपि उद्धरणं समुपलभ्यते। अतोऽस्य समयः अष्टमशतकादनन्तरं त्रयोदशशतकात्पूर्वमर्थात् सम्भवतः दशमशतक इति वक्तुं शक्यते।

पाठगतप्रश्नाः

७१. 'दैव' इति पदस्य का टीका।

७२. पुराषाकारः अस्य टीकायाः कर्त्ता कः।

७३. पुरुषाकारः अयं ग्रन्थः कुतः प्रकाशितः जातः।

७४. गोविन्दस्वामिनः कः कालः।

३.४.२) षड्गुरुशिष्यः

अस्य विदुषः टीकानां सङ्ख्या न स्वल्पा। अयं विद्वान् ऐतरेयब्राह्मणस्य, ऐतरेयारण्यकस्य, आश्वलायनश्रौतसूत्रस्य, आश्वलायगृह्यसूत्रस्य च व्याख्याम् कृतवान्। वेदान्तदीपिकाख्यायाः कात्यायनस्य सर्वानुक्रमण्याः व्याख्या अस्य विदुषः अस्ति यत् तस्य सरसरचनाकौशलेन नितरां प्रसिद्धा। इयं व्याख्या आक्सफोर्ड-विश्वविद्यालयद्वारा सुसम्पादिता प्रकाशिता अस्ति। ग्रन्थकारः स्वयमस्याः टीकायाः रचनाकालः १२३४ सं. तथा तदनुसारेण ख्रीष्टस्य ११७७ई. लिखितवान्। अतः सद्गुरुशिष्यस्य समयः ख्रीष्टीयद्वादशशतकस्य पूर्वार्धे एवाऽस्ति, इति निश्चयेन वक्तुं शक्यते।

पाठगतप्रश्नाः

७५. सद्गुरुशिष्यः केषां व्याख्यानानि लिखितवान्।

७६. सर्वानुक्रमण्याः व्याख्या केन सुसम्पादिता।

पाठसारः

अस्मिन् पाठे वयम् ऋक्सामयजुरथर्ववेदानां भाष्यकाराणां विषये विस्तृतं ज्ञानं प्राप्तवन्तः। ऋग्वेदभाष्यकारेषु प्रसिद्धाः सन्ति स्कन्दस्वामि-नारायणोद्‌गीथ-माधवभट्ट-वेङ्कटमाधव-आनन्दतीर्थ-सायणाचार्यप्रभृतयः। तेषां जन्मस्थानं जन्मकालः तैः कृतानां वेदभाष्याणां च विषये ज्ञानं प्राप्तवन्तः। ततश्च वयं माधव-गुणविष्णु-इत्यनयोः सामवेदभाष्यकर्त्रोः परिचयं प्राप्तवन्तः। तेषां कालादिविषये च भूयशः चर्चां कृतवन्तः। उव्वट-महीधर-हलायुध-भट्टभास्कराणां शुक्लयजुर्वेदभाष्यकारान् ज्ञातवन्तः। तेषु च उव्वटस्य कालविषये प्रवर्तमानं महान्तं विवादम् अवलोकितवन्तः। तदनन्तरं अथर्ववेदभाष्यकारयोः गोविन्दस्वामि-षड्गुरुशिष्ययोः च देशकालादिकम् अवगतवन्तः। यद्यपि एतेभ्यः अधिकाः अपि नैके वेदभाष्यकाराः सन्ति तथापि तेषु एते एव अधिकप्रसिद्धाः। अतः एतेषां जीवनावलोकनेन वयं वेदभाष्यकाराणां सामान्यं ज्ञानम् अनेन पाठेन प्राप्तवन्तः। किञ्च तैः लिखितानां भाष्याणां कानि प्रकाशितानि कानि इदानीम् अपि अप्रकाशितानि एव वर्तन्ते तदपि ज्ञातवन्तः।

पाठान्तप्रश्नाः

१. स्कन्दस्वामिनः कीर्तित्वं वर्णयत।
२. माधवभट्टस्य देशकालकीर्तिपरिचयं लिखत ।
३. आनन्दतीर्थाचार्यस्य परिचयं लिखत।
४. सायणाचार्यस्य कीर्तेः वर्णनं कुरुत।
५. गुणविष्णोः देशकालकीर्तेः परिचयं व्याख्यात।
६. उव्वटस्य विषये संक्षेपेण लिखत।
७. हलायुधस्य कीर्तिं व्याख्यात।
८. भट्टभास्करस्य परिचयं लिखत ।
९. गोविन्दस्वामिनः विषये संक्षेपेण लिखत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि (ऋग्वेदभाष्यकाराः)

१. स्कन्दस्वामि-नारायण-उद्‌गीथ-माधवभट्ट-वेङ्कटमाधव-आनन्दतीर्थ-आत्मानन्द-सायणप्रभृतयः भाष्यकृत्सु सुप्रसिद्धाः पण्डिताः सन्ति।

२. स्कन्दस्वामी निरुक्तेः टीकां रचितवान्।

३. ऋग्वेदसंहितायाः सर्वप्रथमभाष्यम् अधुना स्कन्दस्वामिनः उपलभ्यते।

४. स्कन्दस्वामिनः जन्म गुर्जरप्रदेशस्य विद्यापीठतया राजधानीभावेन च पुरा विख्याते 'वलभी' इत्याख्यनगरे अभवत्।

५. स्कन्दस्वामिनः पितुः नाम भर्त्तृध्रुवः आसीत्।

६. हरिस्वामिनः गुरुः स्कन्दस्वामी।

७. शतपथब्राह्मणस्य विख्यातः भाष्यकारः स्कन्दस्वामी।

८. स्कन्दस्वामिनः ऋग्वेदस्य सुविस्तृतं भाष्यं विरचितवान्।

उत्तराणि (नारायणः)

९. नारायणः उद्गीथः च स्कन्दस्वामिनः समये एव आस्ताम्।

१०. नारायणः ऋग्वेदभाष्ये स्कन्दस्वामिनं प्रति साहाय्यम् अकरोत् इत्येतद् वेङ्कटमाधवस्य मतम् अस्ति।

११. नारायणस्य समयः विक्रमस्य सप्तमशताब्द्याम् एव प्रामाणितो भवति।

उत्तराणि (उद्गीथः)

१२. ऋग्वेदस्य अन्तिमभागस्य भाष्यम् उद्गीथः रचितवान्।

१३. प्राचीनकाले आधुनिककर्णाटकस्य प्रतीच्यभूखण्डः 'वनवासीप्रान्तः' इति नाम्ना ख्यातः आसीत्।

१४. उद्गीथाचार्यः 'वनवासीप्रान्तः' इति अस्य प्रान्तस्य प्रायः निवासी इति चिन्त्यते।

१५. पञ्चत्रिंशदधिकोनविंशतितमे ख्रीष्टाब्दे लाहौरनगरस्य डी.ए.वी. महाविद्यालयस्य शोधितविभागः भाष्यमिदं ऋग्वेदस्य प्रारम्भिकार्द्धभागं प्रकाशितवान्।

उत्तराणि (माधवभट्टः)

१६. इतिहासकाराः माधव-नामधेयानां चतुर्णां भाष्यकाराणां नामोल्लेखं कुर्वन्ति।

१७. माधवस्य ऋग्वेदे विलक्षणं पाण्डित्यं दृश्यते।

१८. सायणो वेङ्कटश्चोभौ माधवस्य भाष्यस्य अनुसरणं कृतवन्तौ।

उत्तराणि (वेङ्कटमाधवः)

१९. वेङ्कटमाधवः सम्पूर्णऋक्संहितायाः उपरि स्वभाष्यं प्रणीतवान्।

२०. वेङ्कटमाधवः वसिष्ठगोत्रे जन्म गृहीतवान्।

२१. वेङ्कटमाधवस्य पिता वेङ्कटाचार्यः आसीत्।

२२. वेङ्कटमाधवस्य माता सुन्दरीदेवी आसीत्।

२३. वेङ्कटमाधवस्य एकः सङ्कर्षणाख्यः अनुजः अपि आसीत्।

२४. वेङ्कटमाधवस्य वेङ्कटगोविन्दाख्यौ द्वौ पुत्रौ आस्ताम्।

उत्तराणि (आनन्दतीर्थः)

२५. आनन्दतीर्थः एव 'मध्व' इत्यनेन नाम्ना सुप्रसिद्धः आसीत्।

२६. आनन्दतीर्थस्य व्याख्यानमिदं छन्दोबद्धम् अस्ति।

२७. 'वेदैश्च सर्वैरहमेव वेद्यः' वचनमिदं श्रीमद्भगवद्गीतायाम् उपलभ्यते।

२८. आनन्दतीर्थाचार्यः वैष्णवसम्प्रदायस्य अस्ति।

२९. नारायणः पूर्णपुरुषोऽस्ति।

३०. मध्वः द्वैतवादस्य प्रवर्तनम् कृतवान्।

३१. मध्वभाष्यं ऋग्वेदस्य उपरि वर्तते।

३२. जयतीर्थस्य टीकायाः विवृतिं १७१८ विक्रमाब्दे नरसिंहः लिखितवान्।

३३. आनन्दतीर्थस्य आविर्भावकालः विक्रमस्य पञ्चपञ्चाशदधिकद्वादशाब्दतः विक्रमस्य पञ्चत्रिंशदाब्दपर्यन्तम्।

उत्तराणि (सायणाचार्यः)

३४. आचार्यसायणः विजयनगरसंस्थापकस्य महाराजबुक्कस्य महाराजहरिहरस्य च अमात्यः सेनानीः च आसीत्।

३५. आचार्यसायणस्य वेदभाष्यम् अस्ति।

३६. महाराजस्य बुक्कस्य प्रधानम् मन्त्रिपदम् सायणाचार्यः१३६४ ख्रीष्टाब्दतः १३७८ ख्रीष्टाब्दपर्यन्तम् अलंकृतवान्।

३७. ख्रीष्टस्य चतुर्दशशताब्देः उत्तरार्द्धः एव सायणस्य भाष्यस्य रचनाकालः कल्पयितुं शक्यते।

३८. सायणाचार्यस्य निजज्येष्ठभ्रातुः नाम माधवाचार्यः।

३९. सायणाचार्यः १३७९ ख्रीष्टाब्दतः १३८७ ख्रीष्टाब्दपर्यन्तं महाराजस्य हरिहरस्य मन्त्रिपदम् मृत्युपर्यन्तम् अलङ्कृतवान्।

उत्तराणि (माधवः)

४०. माधवः सामसंहितायाः प्रथमभाष्यकारः।

४१. माधवेन कृतस्य भाष्यस्य नाम 'विवरणम्' अस्ति।

४२. 'विवरणम्' अस्य भाष्यस्य अन्वेष्टा सत्यव्रतसामश्रयीमहोदयः।

४३. माधवस्य पितुः नाम नारायणः इति आसीत्।

४४. 'त्रयीमयाय'- अनेन शब्देन ज्ञायते यद् अयं श्लोकः कस्यापि वैदिकग्रन्थस्य एव मङ्गलाचरणम् आसीत्।

उत्तराणि (गुणविष्णुः)

४५. गुणविष्णोः साममन्त्रव्याख्यानस्य नाम मिथिलायां बङ्गप्रदेशे चातिप्रसिद्धम् अस्ति।

४६. गुणविष्णुः साममन्त्राणां व्याख्यां कृतवान्।

४७. महापुरुषः मिथिलायाः बङ्गप्रदेशस्य वा कस्मिंश्चिदपि भागे अवसत्।

४८. छान्दोग्यमन्त्रभाष्यस्यैकम् सुष्ठु संस्करणम् 'कलकत्ता-संस्कतं परिषद्' इति नाम्नः संस्थातः प्रकाशितं जातम्।

४९. गुणविष्णोः समयः विक्रमस्य द्वादशशतकस्य चरमभागः त्रयोदशतकस्यादिमभागश्च निश्चीयते।

५०. बल्लालसेनस्य पुत्रस्य नाम लक्ष्मणसेनः।

५१. गुणविष्णोः समयः विक्रमस्य द्वादशशतकस्य चरमभागः त्रयोदशतकस्यादिमभागश्च निश्चीयते।

५२. गुणविष्णोः नितान्तविख्यातः ग्रन्थः अस्ति छान्दोग्यमन्त्रभाष्यम्।

उत्तराणि (उव्वटः)

५३. उव्वटः काश्मीरप्रदेशस्य विद्वान् आसीत्।

५४. उव्वटः यजुर्वेदसंहितायां स्वनाम्ना भाष्यं रचितवान्।

५५. उव्वटस्य पितुः नाम 'वज्रटः'।

उत्तराणि (महीधरः)

५६. वैदिककालाद् एव संस्कृतविद्यायाः अन्यतमं प्रधानकेन्द्रं काशी आसीद्।

५७. काश्यां गौतमप्रभृतयः अन्ये च विद्वांसः अभवन्।

५८. महीधरः नागर-ब्राह्मणवंशीयः विद्वान्।

५९. महीधरः काश्याम् अध्ययनं समाप्य काशीनरपतेः शरणं गतवान्।

६०. महीधरः सामवेदस्य भाष्यं रचितवान्।

६१. महीधरः तन्त्ररहस्यज्ञः आसीत्।

६२. 'मन्त्रमहोदधि'- एनं ग्रन्थं महीधरः लिखितवान्।

६३. महीधरस्य भाष्यकारस्य समयः षोडशशतकस्य उत्तरार्द्धः इति निश्चीयते।

६४. महीधरस्य उपासकः नरसिंहः।

उत्तराणि (हलायुधः)

६५. हलायुधः शुक्लयजुर्वेदस्य काण्वसंहितायाः उपरि स्वस्य विशिष्टभाष्यमस्ति।

६६. हलायुधस्य भाष्यस्य नाम 'ब्राह्मणसर्वस्वम्' इति अस्ति।

६७. लक्ष्मणसेनः त्रिंशद्वर्षाणि (३० ब.) राज्यं करोति स्म।

६८. लक्ष्मणसेनस्य समयः वि.स. १२२७-१२३७ (ईशवीयस्तु ११७०-१२००) विद्यते।

६९. हलायुधः शैवदर्शनस्य आचार्यः आसीत्।

७०. हलायुधस्य ब्राह्मणसर्वस्वम्, मीमांसासर्वस्वम्, वैष्णवसर्वस्वम्, शैवसर्वस्वम्, पण्डितसर्वस्वञ्चेति पञ्चग्रन्थाः नितान्तप्रौढाः प्रसिद्धाः ग्रन्थाः आसन्।

उत्तराणि (गोविन्दस्वामी)

७१. 'दैव' इति पदस्य टीका 'पुरुषकारः' इति।

७२. पुराषाकारः इत्यस्याः टीकायाः कर्त्ता श्रीकृष्णलीलांशुकमुनिः।

७३. पुरुषाकारः अयं ग्रन्थः ग्रन्थः अयमनन्तशायमग्रन्थमालायां प्रकाशितोऽस्ति।

७४. गोविन्दस्वामिनः समयः अष्टमशतकादनन्तरं, त्रयोदशशतकात्पूर्वमर्थात् सम्भवतः दशमशतकम् इति वक्तुं शक्यते।

उत्तराणि (सद्गुरुशिष्यः)

७५. सद्गुरुशिष्यः ऐतरेयब्राह्मणस्य ऐतरेयारण्यकस्य, आश्वलायनश्रौतसूत्रस्य, आश्वलायगृह्यसूत्रस्य च व्याख्यानानि लिखितवान्।

७६. सर्वानुक्रमण्याः व्याख्या आक्सफोर्ड-विश्वविद्यालयद्वारा सुसम्पादिता।

॥ इति तृतीयः पाठः ॥